Civil Services (Main)
Examination- 2025

**वियोज्यम् DETACHABLE**

# संस्कृतम् (प्रथमं प्रश्नपत्रम्)
# (साहित्यम्)

# SANSKRIT (Paper I)
# (LITERATURE)

*समयः : होरात्रयम् (घंटा-त्रयम्)*
*Time Allowed : Three Hours*

*पूर्णाङ्काः : 250*
*Maximum Marks : 250*

## प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खंडद्वयेषु** विभाजिताः **अष्ट** प्रश्नाः ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये । शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम् । तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम् ।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।

प्रश्नसंख्या **1, 5** तथा **8 संस्कृतभाषयैव** समाधेयाः । शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम् । संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया ।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया । अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1, 5** and **8** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answer written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड 'A' SECTION 'A'

1.(a) अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः :

Answer all of the following (to be written in Sanskrit language) : 1×10=10

(i) 'खय्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः ।

(ii) ईषत्स्पृष्टं प्रयत्नं केषां वर्णानाम् ? तेषां नामानि लिखत ।

(iii) पदस्य का संज्ञा ?

(iv) 'त्वं गृहं गच्छसि' - वाच्यपरिवर्तनं कुरुत ।

(v) 'नद्यम्बु' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः करणीयः ।

(vi) 'गङ्गौघः' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिस्थितिः विवेचनीया ।

(vii) 'यूपदारु' इत्यत्र विग्रहं समासनाम च लिखत ।

(viii) 'पञ्चानां गवां समाहारः' इत्यत्र समासं समासनाम च लिखत ।

(ix) 'सीतया वनं गतम्' - वाच्यपरिवर्तनं कुरुत ।

(x) गुणसंज्ञाविधायकं सूत्रं किम् ?

1.(b) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं संस्कृतभाषया विभक्तिनिर्णयं कुरुत : 2×5=10

(i) <u>गां</u> दोग्धि पयः ।

(ii) अलं <u>श्रमेण</u> ।

(iii) <u>हिमालयात्</u> गङ्गा प्रभवति ।

(iv) <u>हरये</u> क्रुध्यति ।

(v) <u>ग्रामस्य</u> दक्षिणतः नदी ।

1.(c) अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि 3-4 पंक्तिभिः लिखत - 2×5=10

(i) हलन्त्यम् ।

(ii) एचोऽयवायावः ।

(iii) कालाध्वनोरत्यन्तसंयोगे ।

(iv) उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।

(v) पञ्चमी भयेन ।

1.(d) आधारस्य भेदान् सोदाहरणं व्याख्यात । 10

Explain types of आधार with examples.

1.(e) विशेषणं विशेष्येण बहुलम् - सोदाहरणं व्याख्यात । 10

विशेषणं विशेष्येण बहुलम् - Explain with examples.

2. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

2.(a) वैदिकसंस्कृतस्य प्रमुखवैशिष्ट्यानि दर्शयत । 20

Illustrate major features of the Vedic Sanskrit.

2.(b) संस्कृतकाव्यशास्त्रे अलङ्कारसम्प्रदायस्य विकासं वर्णयत । 15

Elucidate the development of the अलङ्कारसम्प्रदाय in Sanskrit poetics.

2.(c) लौकिकसंस्कृतभाषायां पदविज्ञानस्य वैशिष्ट्यं वर्णयत । 15

Describe the significance of morphology in classical sanskrit language.

3. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 15+10+15+10=50

3.(a) रामायणस्य सामाजिकं पक्षं वर्णयत । 15

Describe the social aspects of the Rāmāyaṇa.

3.(b) 'भारवेरर्थगौरवम्' - सोदाहरणं वर्णयत । 10

भारवेरर्थगौरवम् - Elucidate with examples.

3.(c) वाक्यं रसात्मकं काव्यम् - सोदाहरणं विमृशत । 15

वाक्यं रसात्मकं काव्यम् - Elaborate with examples.

3.(d) संस्कृतखण्डकाव्यस्य विकासं वर्णयत । 10

Discuss the development of Sanskrit khaṇḍa-kāvya.

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

4.(a) नाट्यसाहित्यस्य उद्भवं विकासं च वर्णयत । 20

Describe the origin and development of the dramatic literature.

4.(b) इतिहासस्य उपादानरूपेण महाभारतस्य वैशिष्ट्यं लिखत । 15

Write the significance of the Mahābhārata as the source of the history.

4.(c) काव्यहेतुविषये निबन्धं रचयत । 15

Write an essay on the subject of Kāvyahetu.

## खण्ड 'B' SECTION 'B'

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः : 10×5=50

Answer all of the following (to be written in Sanskrit language) :

5.(a) प्राचीनभारतस्य ललितकलाम् अधिकृत्य निबन्धं लिखत । 10

5.(b) अर्थशास्त्रस्य प्रमुखान् प्रतिपाद्यान् विषयान् वर्णयत । 10

5.(c) गृहस्थस्य धर्मान् वर्णयत । 10

5.(d) प्राचीनभारतस्य खगोलभूगोलविज्ञानं विमृशत । 10

5.(e) ब्रह्मचर्याश्रमस्य संस्कारान् वर्णयत । 10

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

6.(a) वेदान्तदर्शनानुसारम् अनुबन्धचतुष्टयं प्रतिपादयत । 20

Describe the fourfold anubandhas according to the Vedānta-philosophy.

6.(b) सांख्यदर्शनम् अनुसृत्य सत्कार्यवादं निर्णयत । 15

Justify the satkāryavāda according to the Sāṁkhya-philosophy.

6.(c) योगदर्शनस्य अष्टाङ्गानि वर्णयत । 15

Describe the eight aṅgas of the Yoga-philosophy.

7. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

7.(a) न्यायदर्शनम् अनुसृत्य प्रत्यक्षस्य लक्षणं भेदान् च वर्णयत । 20

Elaborate the definition and classification of the perception by following the Nyāya-philosophy.

7.(b) वैशेषिकदर्शनानुसारं कारणस्य भेदान् सलक्षणं वर्णयत । 15

Describe the definition and classification of the cause according to the Vaiśeṣika-philosophy.

7.(c) जैनदर्शनस्य सप्तभङ्गीनयं वर्णयत । 15

Explain the saptabhaṅgī-naya of the Jaina-philosophy.

8. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः : 25+25=50

Answer all of the following (to be written in Sanskrit Language) :

8. (a) अधोलिखितं सन्दर्भं सम्यक् अवधार्य तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या स्वेन संस्कृतेन दीयताम् । प्रत्येकम् उत्तरं 3-4 पंक्तिभिः भवेत् : 5×5=25

पुरा त्रयो व्यवसायाः प्रधानरूपेण प्रचलिता आसन् - कृषिः पशुपालनं शिल्पं च । एतैर्निष्पन्नानि वस्तूनि व्यापारद्वारा देशेषु विदेशेषु च प्रेष्यन्ते स्म । प्राचीना भारतीयाः कृषिप्रधाना आसन् सम्प्रत्यपि सन्ति । कृषिजं वस्तु अवलम्ब्य माङ्गलिको विधिरनुष्ठीयते । अन्नस्य महिम्ना कृषिगौरवं ज्ञायते । तथा हि - अन्नं न निन्द्यात् । अन्नवानन्नादो भवति । अन्नं न परिचक्षीत । अन्नं बहु कुर्वीत । तद् व्रतम् । एवं तैत्तिरीयोपनिषदन्नस्य महिमानं स्तौति । अन्नं ब्रह्मेति मतम् । नवीनप्रस्तरयुगे वन्यानामन्नानां भोज्यत्वमभोज्यत्वं वा परिज्ञातुं प्रयासोऽभवत् । खाद्यान्नानां कृषिविधिना कृत्रिमैरुपायैर्विकासः समारब्धः । तस्मात् कालादारभ्य कस्मिन् ऋतौ कीदृशे च क्षेत्रे कियन्मात्रं बीजं वपनीयम्, तस्य सुसंवर्धनाय कियत् सेचनं कर्तव्यम्, भूमेरुत्पादकशक्तिः कथं वर्धनीयेति समस्या अधिकृत्य सम्यग्गवेषणं कृतम् । प्रयतमानाश्च ते कृषका अस्मिन् विषये स्वदेशस्य विदेशानां च बीजानि फलानि च स्वदेशे संवर्धितवन्तः । नित्यमेव वन्यानां कृषिजानां चान्नानां कृषिकल्पं कृतवन्तः ।

प्रश्नाः -

(i) पुरा के के व्यवसायाः प्रचलिताः ?

(ii) अन्नस्य महिमा कीदृशं स्तूयते स्म ?

(iii) नवीनप्रस्तरयुगे कीदृशः प्रयासः समारब्धः ?

(iv) कृषिनिमित्तं कीदृशं गवेषणं कृतम् ?

(v) कृषकाः अस्मिन् विषये किं कृतवन्तः ?

8. (b) अधोलिखितं सन्दर्भं सम्यक् अवधार्य तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या स्वेन संस्कृतेन दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत् : 5×5=25

गृहत्यागादनन्तरं सिद्धार्थः सत्यस्य साधनायां संलग्नोऽभवत् । पञ्चभिर्भिक्षुभिः अटन् ऊरुबेलायामेकान्तक्षेत्रे स प्राविशत् । सत्यसन्धानाय स तत्र स्थितवान् । जनाः तं शाक्यमुनिरिति ज्ञातवन्तः । तस्य अयं कालः आर्यपर्यवेक्षणाकाल उच्यते । शाक्यमुनिः सत्यानुसन्धाने शान्तिपर्येषणायां च भ्रमति स्म । स कठोरान् नियमान् पालयामास । परन्तु आत्मशान्तिर्न लब्धा । ध्यानयोगेन अपि सन्तोषो न प्राप्तः । योगाभ्यासेनापि जरामरणादीनामन्तो नावलोकितः । षड् वर्षाणि कृच्छ्रं तपः कृत्वा विषादग्रस्तः सन् तत् स्थानं परित्यज्य स गयां गतवान् । तत्र निरञ्जनानदीतटे पिप्पलस्याधः कृतसंकल्पः समासीन आसीत् । सम्बोधिप्राप्त्यै स समाधिस्थः अभवत् । तस्यामवस्थायां सम्बोधिबलेन तस्य आर्यसत्योपलब्धिर्जाता । रात्रेः प्रथमे प्रहरे स्वजीवनस्यातीतमितिहासं द्वितीये प्रहरे च दिव्यदृष्टिबलेन कर्मफलभोगे मग्नं संसारमवलोकितवान् । तृतीये प्रहरे जरामरणादीनां द्वादशानां निदानानां ज्ञानं प्राप्तम् । ततः तेषां निदानानां निवारकस्वरूपस्य निर्वाणस्य अनायासोपलब्धिर्जाता । तस्य साधना फलवती अभवत् । आर्यसत्यानां यथार्थज्ञानेन स बुद्धत्वं प्राप्तवान् ।

प्रश्नाः -

(i) सिद्धार्थः ऊरुबेलायां केन रूपेण उपस्थितः ?

(ii) स कथं शाक्यमुनिः बभूव ? स च कथं भ्रमति स्म ?

(iii) शाक्यमुनिरूपेण तस्य का स्थितिः अभवत् ?

(iv) स कुत्र केन प्रकारेण सम्बोधिं प्राप्तवान् ?

(v) स सम्बोधेः अनन्तरं कथं बुद्धत्वं प्राप्तवान् ?

---